ऋक्तौषा आर्ष्यिका तीर्थवती पवित्रवती शुक्लेति। यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषर्षभद्रविण-देवकसंज्ञावर्षपुरुषा आपोमयं देवमपांपूर्णेनाञ्जलिना यजन्ते" भाग० ५,२०,१२, अन्ययोक्तं कल्पभेदादविरुद्धम्। ८साम्भेदे न० "क्रौञ्चानि भवन्ति" श्रुतिः तच्च साम गेयगाने १५प्र० २यार्द्धे ८,९गानम्। क्रौञ्चपर्वतस्य द्विविधः विष्णु-पुराणोक्तक्रौञ्चद्वीपान्तर्गतः श्वेतगिरेः सन्निकृष्टस्थः हिमवत्पौत्ररूपस्य तमेव प्रकृत्य "प्रालेयाद्रेरुपतटमति-क्रम्य तांस्तान् विशेषान् हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्" मेघदूते वर्णितम्"। क्रौञ्चादिव हंस-निवहो निर्ज्जगाम गुणगुणः" काद०

**क्रौञ्चदारण** पु० क्रौञ्चं पर्व्वतं दारयति दृ–णिच् ल्यु। १कार्त्तिकेये अमरः तद्दारणकथा क्रौञ्चशब्दे भा०व०२२४अ० वाक्यस्था। २परशुरामे च तत्कथा क्रौञ्चरन्ध्रशब्दे दृश्या

**क्रौञ्चपदा** "क्रौञ्चपदा भ्मौ स्भौ ननना नगाविषुशरवसुमुनि विरतिरिह भवेत्" वृ० र० उक्ते पञ्चविंशत्यक्षरपादके छन्दोभेदे

**क्रौञ्चपदी** स्त्री भारतोक्ते तीर्थभेदे "अन्नपृष्ठे पयस्याञ्च निरविन्दे च पर्व्वते। तृतीयां क्रौञ्चपद्याञ्च ब्रह्महत्यां विशुध्यति" भा० आनु० २५अ०

**क्रौञ्चपुर** न० यदुवंश्यसारमन्दपनिर्म्मिते पुरभेदे "सारसेनापि विहितं रम्यं क्रौञ्चपुरं महत्। चम्पकाशोकबहुलं विपुलं ताम्रमृत्तिकम्। वनवासीति विख्यातः स्फीतो जनपदो महान्। पुरस्य तस्य तु श्रीमान् द्रुमैः सर्वर्तुकैर्वृतः। हरि० ९५अ० "ततः सह्याचलयुतं सहार्य्येणाहमव्ययम्। आत्मद्वितीयः श्रीमन्तं प्रवेक्ष्ये दक्षिणापथम्। करवीरपुरञ्चैव रम्यं क्रौञ्चपुरं तथा" ९३अ० "तां (खट्वाङ्गीम्) तीर्त्त्वा निम्नगां तत्र तांश्च दृष्ट्वा तपोवनान्। रम्यं क्रौञ्चपुरं नाम गमिष्यामः पुरोत्तमम्" ०६अ०

**क्रौञ्चबन्धम्** अव्य० क्रौञ्चमिव बद्ध्वा "बन्धः संज्ञायायाम्" पा० णमुल् कमादिषु यथाविध्यनुप्रयोगः। क्रौञ्चमिव बद्ध्वा बद्ध इत्यर्थे

**क्रौञ्चरन्ध्र** न० क्रौञ्चस्य रन्ध्रम्। मानसस्थहंसनिर्गममार्गे क्रौञ्चपर्व्वतस्थे रन्ध्रे "हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्" मेघ०। "मानसस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्ते इत्यागमः" मल्लि० क्रौञ्चादिव हंसनिवहो निर्जगाम गुणगणः" काद०। तच्च रन्ध्रं परशुरामेण कृतं यथा मेघदूतव्याख्याने मल्लिनाथआह

"पुरा किल भगवतो देवात् धूर्ज्जटेः धनुरुपनिषदम् अधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्द्धया क्रौञ्चं शिख-रिणम् अतिनिशितविशिखमुखेन हेलया कृतपिगडभेदं भित्त्वा ततः क्रौञ्चभेदादेव सद्यःसमुज्जृम्भिते कस्मिन्नपि यशःक्षीरनिधौ निखिलमपि जगज्जालम् आप्लावितमिति" कथा श्रूयते"।

**क्रौञ्चसूदन** पु० क्रौञ्चं मयदैत्यसुतं सूदयति सूद–णिच्–ल्यु। कार्त्तिकेये तस्य तथात्वं क्रौञ्चशब्दे स्कन्दसंहितावाक्यात् ज्ञेयम् "स ते स्कन्दः प्रसीदतु" इत्युपक्रमे "रम्यदिव्यवपुर्देवः पातु त्वां क्रौञ्चसूदनः" सुश्रुते उक्तम्। क्रौञ्चनिसूदकादयोऽप्यत्र "ऋषभद्वीपमासाद्य सेव्यं क्रौञ्च-निसूदकम्। सरस्वत्यामुपस्पृश्य विमानस्थो विराजते" भा०व० ८४अ०

**क्रौञ्चवत्** पु० क्रौञ्चाः वकभेदा बाहुल्येन सन्त्यत्र मतुप् मस्य वः। पर्व्वतभेदे "कैलासं क्रौञ्चवन्तं च तथाद्रिं गन्धमादनम्" हरि० २०२अ०। क्रौञ्चयुक्तमात्रे त्रि० स्त्रियां ङीप्।

**क्रौञ्चादन** न० अद्यते कर्म्मणि ल्युट् ६त०। १मृणाले २चि-ञ्चोटके (चेँचको) ३घेञ्चुलिकायां (घेँचु) मेदि०। ४पिप्पल्यां शब्दरत्ना० पद्मबीजे स्त्री० राजनि० ङीप्।

**क्रौञ्चाराति** पु० क्रौञ्चस्य दैत्यभेदस्याऽरातिः। १कार्त्तिकेये हला० २परशुरामे च शब्दमाला क्रौञ्चरिपुप्रभृतयोऽप्यत्र।

**क्रौञ्चारण्य** न० जनस्थानात् क्रोशत्रयान्तरे दण्डकारण्य-पार्श्ववर्त्तिनि वनभेदे "ततः परं जनस्थानात् त्रिक्रोशं गत्य राघवौ। क्रौञ्चारण्यं विविशतुर्गहनं तौ महौ-जसौ" रामा० आर० ६९अ०। "ततः पूर्व्वेण गत्वा च त्रिक्रोशं भ्रातरावुभौ। क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्र-मान्तिके" तत्रैवोक्तेः तस्य मतङ्गाश्रमात् त्रिक्रोशान्त-रितपश्चिमस्थत्वम्।

**क्रौशशतिक** त्रि० क्रोशशताद्भिगमनमर्हति ठञ्। १क्रोश-शतादागन्तरि भिक्षौ। क्रोशशतं गच्छति ठञ्। २क्रोश-शतगन्तरि त्रि०। उभतः स्त्रियां ङीप्।

**क्रौष्टायण्य** पुंस्त्री० प्रकृतिग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् क्रोष्ट्र्या गोत्रापत्यम् कुर्वा० च्फञ् ततः स्वार्थे अस्त्रियाम् ञ्य। क्रौष्टायण्यः क्रोष्टुगोत्रोत्पन्नस्त्रियागोत्रापत्ये। बहुषु यस्का० लुक्। क्रौष्टायणाः तद्गोत्रापत्येषु। ततः अरी-हणा० चतुरर्थ्यां वुञ्। क्रौष्टायणक तन्निर्वृत्तादौ त्रि०।

**क्रौष्टुकि** पुंस्त्री० क्रोष्टेव स्वार्थे क तस्यापत्यम् इञ्। १क्रोष्टु-